दैनिकम् ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ता

**पञ्चाङ्गम्**
गतदिने वि.सं. २०८३,
कलियुगाब्धः ५१२७ ग्रीष्म-ऋतुः
सूर्यः उत्तरायणम् ज्येष्ठकृष्णद्वादशी
बैशाख 31 प्रविष्टांशः मङ्गलमयः भवेत्

■ पृष्ठ-4 ■ वर्ष-5 ■ अङ्क-201 | 1 | मई 14, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com



2 लोकभवनम् ईंधन-संरक्षण-क्षेत्रं घोषितम्, वाहनसमूहः न्यूनो भविष्यति, प्रत्येक- रविवासरे 'पेट्रोल-रहित- रविवासरः' आयोज्यते

3 लोकगायकस्य इन्द्रजीतस्य एकेन पदेन परिवर्तिता प्रवृत्तिः, मोनालपक्षिणः कलगीस्थाने कृत्रिमा 'कलगी' अभवत् जनानां प्रथमा रुचिः

4 पश्चिमबङ्गे ऐतिहासिकं राजनीतिकपरिवर्तनम्- संस्कृतशपथग्रहणेन स्पन्दितं समग्रभारतम्


## सी. जोसेफ् विजयस्य नेतृत्वे तमिलागा वेट्री कझगम् दलस्य सर्वकारेण तमिलनाडु-विधानसभायां बहुमतपरीक्षणं विजितम्



तमिलनाडु-राज्ये, सी. जोसेफ् विजयस्य नेतृत्वे तमिलागा वेट्री कझगम् दलस्य सर्वकारेण तमिलनाडु-विधानसभायां बहुमतपरीक्षणं विजितम्, चतुस्त्वारिन्शोत्तरैकशत विधायकाः पक्षे मतदानं कृत्वा, सभायां स्पष्ट बहुमतं प्रदर्शितवन्तः। अत्रान्तरे द्वाविंशति विधायकाः विश्वास प्रस्तावस्य विरुद्धं मतदानं कृतवन्तः । कार्याचरण-समये प्रमुखः विपक्षदलं डी. एम्. के. विधानसभासदनात् बहिर्गच्छत्। सहचैव समाप्ते विधानसभानिर्वाचने तस्य दलेन केवलं अष्टोतरैकशतासनानि प्राप्तानि आसन्, तमिळनाडोः राज्यपालेन राजेन्द्र-विश्वनाथ-आर्लेकर् वर्येण विजयाय सदने बहुमतं साधयितुं आज्ञापितम् आसीत्।

## एन्, रंगासामिः पुदुचेरी-राज्यस्य मुख्यमन्त्रीरूपेण पञ्चमं बारं शपथग्रहणं कृतवान्



अखिलभारतीय- राष्ट्रिय काङ्ग्रेस्-दलस्य नेता एन्, रंगासामिः पुदुचेरी-राज्यस्य मुख्यमन्त्रीरूपेण पञ्चमं बारं शपथ ग्रहणं कृतवान्। लोकनिवासे आयोजिते समारोहे पुदुचेरी-नगरस्य उपराज्यपालः के. कैलासनाथन्-वर्यः पदस्य गोपनीयतायाः च शपथ ग्रहणं कारितवान्। अखिलभारतीय-राष्ट्रिय काङ्ग्रेस्-दलस्य मल्लादि कृष्णरावः, भाजपेति दलस्य ए. नमस्सिवायम् च अस्मिन् समारोहे मन्त्रीरूपेण शपथं स्वीकृतवन्तः।

## पश्चिम-एशिया-संघर्षेन उद्भूतस्य वैश्विक ऊर्जा-सङ्कटकालस्य मध्ये प्रधानमन्त्रिणः नरेन्द्र-मोदिनः आह्वानस्य अनन्तरं केन्द्र-राज्ययोः इन्धन-संरक्षणस्य उपायाः तीव्राः जाताः

प्रधानमन्त्री नरेन्द्रमोदी विशेषरक्षा-समूहस्य (एस्. पी. जी.) प्रोटोकाल् इत्यस्य अन्तर्गते सर्वाः आवश्यकाः सुरक्षाव्यवस्थाः अवलम्ब्य सद्यः एव आन्तरिकयात्रासु स्वस्य यात्रावाहनानां संख्या न्यूनीकृतवान्। सुत्रानुसारं प्रधानमन्त्रिणः यात्रावाहनानां सङ्ख्यायां न्यूनीकरणं तस्य सद्यः गुजरातस्य असम्-राज्यस्य च भ्रमणकाले कार्यान्वितम्। आर्थिक स्थिरतायै योगदानाय नागरिकान् प्रति प्रधानमन्त्रिणः सप्ताग्रहाणाम् अनुरूपम् एतत् अभवत्। प्रधानमन्त्रिणः नरेन्द्र-मोदिनः आग्रहानन्तरं, केन्द्रीय-गृह-मन्त्री अमितशाहेन, उत्तरप्रदेशस्य, मध्यप्रदेशस्य, दिल्ल्याः च मुख्यमन्त्रिभिः, विधायकैः, जनप्रतिनिधिभिः च आधिकारिकयानानां संख्या पञ्चाशत् प्रतिशतं यावत् न्यूनीकर्तुं आदेशः प्रदत्तः

## केन्द्रीयमन्त्रिमण्डलेन चतुर्दश-खरिफेति ग्रैष्मिक-सस्यानां न्यूनतमसमर्थनमूल्यं स्वीकृतम्



केन्द्रीयमन्त्रिमण्डलेन विपणन-सत्रस्य षड्विंशत्यधिक द्विसहस्र सप्तविंशत्यधिक द्विसहस्र वर्षयोः कृते चतुर्दश खरिफ इति ग्रैष्मिक-सस्यानां न्यूनतमसमर्थनमूल्ये वृद्धिं स्वीकृतम्। केन्द्रीयमन्त्रिमण्डलस्य सभायाः अनन्तरं प्रसारमाध्यमान् सम्बोधयन् सूचना-प्रसारण-मन्त्री अश्विनी-वैष्णवः अवदत् यत्, सर्वकारेण ग्रैष्मिक सस्यानां न्यूनतम समर्थन-मूल्यम् वर्धितम् अस्ति येन उत्पादकेभ्यः तेषाम् उत्पादानां कृते लाभप्रदं मूल्यं सुनिश्चितं भविष्यति। सः अवदत् यत्, ग्रैष्मिक कालस्य कृते कृषकाणां कृते प्रायः षष्टीसहस्राधिक द्विलक्ष-कोटि-रूप्यकाणि प्रदीयन्ते। सः अवदत् यत्, अस्मिन् ऋतौ चतुर्विंशत्यधिक-अष्टशत लक्ष-मेट्रिक् टन्- तोप्यधिकानि सस्यानि प्राप्तानि भविष्यन्ति। श्री वैष्णवः अवदत् यत्. एम्. एस्. पी. मध्ये सर्वाधिकं द्वाविंशत्यधिकषट्शतं रूप्यकाणि प्रति क्विण्टल् वृद्धिः सूर्यमुखीबीजानां कृते अनुशंसितम्, तदनन्तरं सप्तपञ्चाशदधिक पञ्चशतं रूप्यकाणि प्रति क्विण्टल् कार्पासस्य कृते, पञ्चशतं रूप्यकाणि प्रति क्विण्टल् तिलस्य कृते च अनुशंसितम् अस्ति।

## केन्द्रीयमन्त्रिमण्डलेन भू-अङ्गारस्य प्रोत्साहनाय सार्द्धसप्त-त्रिंशत्कोटिरूप्यकाणां वित्तीयव्ययस्य योजना अनुमोदिता




लिग्नाईट-गैसिफ़िकेशन्-परियोजनायाः केन्द्रीयमन्त्रिमण्डलेन भू-अङ्गारस्य तथा प्रोत्साहनाय सार्द्धसप्तत्रिंशत्कोटि रूप्यकाणां वित्तीयव्ययस्य योजना अनुमोदिता। प्रसारमाध्यमान् सम्बोधयन् केन्द्रीय-सूचना-प्रसारण-मन्त्री अश्विनी-वैष्णवः अवदत् यत्, इयं योजना भारतस्य अङ्गारस्य, लिग्नाईट्-गैसीफिकेशनेत्यस्य च कार्यक्रमं गति-प्रदानाय प्रमुखं पदाक्षेपम् अस्ति। श्री वैष्णवः अवदत् यत् योजनायाः अन्तर्गतं त्रि-लक्ष-कोटि-रूप्यकाणां अपेक्षित-निवेशः भविष्यति।

## केन्द्रीय-माध्यमिक-शिक्षा-परिषदा द्वादशी कक्षायाः परीक्षा-परिणामाः प्रसारिताः

केन्द्रीय-माध्यमिक-शिक्षा-परिषदा द्वादशी कक्षायाः परीक्षा-परिणामाः प्रसारिताः। छात्राः आधिकारिक वेबसाइट्, डिजिलॉकर्-इत्यत्र, उमङ्ग्-ऐप्-इत्यत्र च स्वानुक्रमाङ्ङ्कान् प्रविश्य परिणामं द्रष्टुं शक्नुवन्ति। अस्मिन् वर्षे केन्द्रीय-माध्यमिक-शिक्षा-परिषदा द्वादशी कक्षायाः परीक्षाः फरवरी-मासस्य सप्तदश-दिनाङ्कतः अप्रैल-मासस्य दश-दिनाङ्क-पर्यन्तं लक्षोपलक्ष-छात्राणां कृते आयोजिताः आसन्।

## सुभाषितम्

**यथा खननं खनित्रेण, नरो वार्यधिगच्छति।**
**तथा गुरुगतं विद्यां, शुश्रूषुरधिगच्छति॥**

भावार्थः- जिस प्रकार धैर्यपूर्वक भूमि को कुदाल से गहराई तक खोदने पर भूमिगत जल का स्रोत प्राप्त हो जाता है, उसी प्रकार किसी योग्य गुरु से भी लग्न और श्रद्धापूर्वक सेवा करके ही विद्या प्राप्त हो सकती है।


दैनिक ई-संस्कृतवार्तापत्रम्
हिमसंस्कृतवार्ताः
हिमसंस्कृतवार्तापत्रस्य एकवर्षस्य सदस्यता
१०० ₹
One year subscription to the daily Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message saying hello on the number below.
7876636263

सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति

कार्यालयः
हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे
कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यावहरसङ्केतः-१७७१११
सङ्केता- प्रबन्धनिदेशिका- शिवानी शर्मा हिमसंस्कृतम्


## भारत-ऋतु-विभागेन राजस्थान-राज्ये उष्णतरङ्गस्य कृते रक्तवर्णीय-संचेतना

भारत-ऋतु-विभागेन राजस्थान-राज्ये उष्णतरङ्गस्य कृते 'रेड्-अलर्ट' इति रक्तवर्णीय-संचेतनायाः सूचना प्रसारिता। गुजरात-राज्ये, महाराष्ट्र, पश्चिम-मध्यप्रदेशे च श्वः यावत् उष्णतरङ्गस्य स्थितिः भवितुम् अर्हति। अपि च, हिमाचलप्रदेशे उत्तराखण्डे च ओलावृष्ट्या सह वर्षायाः सम्भावना विद्यते। दिल्ली, चण्डीगढ, हरियाणा, जम्मू-कश्मीर, उत्तरप्रदेश, झारखण्ड, पञ्जाब् इत्येतेषु प्रदेशेषु विद्युत्सहित-वृष्टिः, तीव्र-वायुवेगः च भविष्यति भारत-ऋतु-विभागेन पूर्वानुमानितम् ।

# लोकभवनम् ईंधन-संरक्षण-क्षेत्रं घोषितम्, वाहनसमूहः न्यूनो भविष्यति, प्रत्येक- रविवासरे 'पेट्रोल- रहित- रविवासरः' आयोज्यते



हिमसंस्कृतवार्ताः- शिमला। हिमाचलस्य राज्यपालेन कवीन्द्रगुप्ता-महाभागेन लोकभवने वैश्विक- ऊर्जा- संकटस्य परिप्रेक्ष्ये भारतस्य सामूहिक-प्रयत्नानां भागरूपेण ईंधन-उपभोगस्य न्यूनतां कर्तुं, नवीकरणीय- ऊर्जाक्षेत्रे च हिमाचलराज्यम् आदर्शराज्यत्वेन स्थापयितुं व्यापक- उपायानां घोषणा कृता। पश्चिम- एशिया- संकटस्य मध्ये ईंधन-संरक्षणाय राष्ट्रीय- आत्मनिर्भरता- सुदृढीकरणाय च नरेंद्रमोदी- महाभागस्य दूरदर्शिनः आह्वानस्य समर्थनार्थम् एते उपायाः स्वीकृताः।

राज्यपालेन घोषणा कृता यत् लोकभवनम् अधुना विशेषम् 'ईंधन-संरक्षण-क्षेत्रम्' भविष्यति। तेन उक्तं यत् लोकभवने प्रत्येकः रविवासरः 'पेट्रोल- रहित- रविवासरः' इति रूपेण आचरिष्यते, यस्य अन्तर्गतं रविवासरे कश्चन सर्वकारीय-वाहनम् ईंधनस्य उपयोगं न करिष्यति। तस्मिन् दिने नियोजितानि सर्वाणि सर्वकारीयकार्याणि वीडियो- सम्मेलन-माध्यमेन अथवा सामूहिक- यात्रा- व्यवस्थया सम्पन्नानि भविष्यन्ति।

राज्यपालेन स्वस्य आधिकारिक-वाहन-समूहस्य वाहनसंख्यां तत्क्षण-प्रभावेन अर्धीकर्तुं निर्देशाः प्रदत्ताः। अस्य निर्णयस्य उद्देश्यं निरर्थक- ईंधन- व्ययस्य न्यूनीकरणं कर्तुम् अस्ति, येन अनुकरणीयम् उदाहरणम् अपि प्रस्तुतं भविष्यति। अनावश्यक-यात्राणां न्यूनतां कर्तुं कतिपयानि सर्धकारीयसमितेः अधिवेशनानि वीडियो- सम्मेलन- माध्यमेन आयोज्यन्ते। तदतिरिक्तं सर्वकारीय- कार्यक्रमाणां आयोजनानां च समन्वयः क्रियते, येन वाहन-गमनागमनस्य न्यूनता भवेत्।

राज्यपालेन एतदपि घोषितं यत् पश्चिम- एशिया- संकटस्य समाप्तेः वैश्विक-ईंधन-मूल्येषु स्थैर्यस्य आगमनपर्यन्तं ते कस्यापि सर्वकारीय-कार्यस्य कृते राज्य-सर्वकारस्य हेलिकॉप्टर-यानस्य उपयोगं न करिष्यन्ति। तेन उक्तं- "यदा देशे ईंधन- संरक्षण- अभियानस्य आह्वानं क्रियते, तदा मम कृते अधिक-ईंधन-व्ययकर-परिवहन-व्यवस्थायाः उपयोगः उचितो न भविष्यति।"

## विश्वविद्यालयस्य कुलपतिभ्यः आह्वानम्

हिमाचल- राज्यस्य सर्वेषां विश्वविद्यालयानां कुलाधिपतित्वेन राज्यपालेन सर्वेभ्यः कुलपतिभ्यः आह्वानं कृतं यत् ते स्व- स्व- विश्वविद्यालय- परिसरेषु तत्क्षणप्रभावेन ईंधन-ऊर्जासंरक्षणं संस्थागतरूपेण स्वीकुर्वन्तु। तेन कुलपतिभ्यः शिक्षकेभ्यः, कर्मचारिभ्यः, विद्यार्थिभ्यश्च कार- पूलिंग, द्विचक्रिकाचालनं तथा दैनिकयात्रायाः कृते सार्वजनिक-परिवहनस्य उपयोगं प्रोत्साहयितुं निर्देशः दत्तः।

तेन विद्यार्थिनः समाजस्य सर्वाधिक-ऊर्जस्विनः प्रभावशालिनश्च वर्गः इति वर्णयित्वा युवभ्यः महाविद्यालयेषु, छात्रावासेषु तथा जनसमुदायेषु ईंधन-संरक्षण-आन्दोलनस्य अग्रदूतत्वं स्वीकर्तुम् आह्वानं कृतम्। राज्यपालेन उक्तं- "विश्वविद्यालयेषु ऊर्जा-संरक्षणस्य अध्ययनेन सह दैनन्दिन-जीवने तस्य आचरणस्य अपि प्रोत्साहनं करणीयम्।"

प्रदेशवासिनः सम्बोधयन् राज्यपालेन उक्तं यत् एषः केवलं ईंधन-संरक्षणस्य उपायः नास्ति, अपि तु राष्ट्रस्य प्रति सामूहिक-उत्तरदायित्वस्य अभिव्यक्तिः अस्ति। तेन विशेषरूपेण युवभ्यः कार- पूलिंग- स्वीकाराय, सार्वजनिक-परिवहनस्य उपयोगाय, पदयात्रायाः तथा द्विचक्रिका-चालनस्य प्रोत्साहनाय च आह्वानं कृतम्, येन ईंधन-संरक्षणेन सह स्वास्थ्य-लाभः अपि स्यात्।राज्यपालेन प्रदेशवासिभ्यः 'वोकल फॉर लोकल' इति भावनां स्वीकर्तुं बलं दत्तम्। तेन उक्तं यत् जनाः आयातितवस्तूनां स्थाने स्थानीय- उत्पादानां, हस्तशिल्पानां, स्वदेशी-वस्तूनां च उपयोगं प्राथमिकतया कुर्वन्तु तथा विदेश-यात्राणां स्थाने देशीय- पर्यटन- स्थलानां भ्रमणं प्राधान्येन स्वीकुर्वन्तु। तेन उक्तं यत् हिमाचल-राज्यं स्वीयेन प्राकृतिकसौन्दर्येण, आध्यात्मिकस्थलैः, साहसिक- पर्यटन-सम्भावनाभिश्च भारतस्य श्रेष्ठ- पर्यटन- स्थलेषु गण्यमानम् अस्ति, येन राष्ट्रीय- अर्थव्यवस्था स्थानीय-रोजगारश्च सुदृढौ भवतः।राष्ट्रनिर्माणे सक्रियभूमिकां निर्वोढुं युवभ्यः आह्वानम्

राज्यपालेन हिमाचलराज्यस्य युवभ्यः राष्ट्रनिर्माणे सक्रियभूमिकां निर्वहन्तु, सामाजिक- उत्तरदायित्वस्य अनुशासनस्य च भावनां सुदृढीकुर्वन्तु इति आह्वानं कृतम्। तेन उक्तं यत् संकटकालेषु भारतस्य महान् बलं देशस्य अखण्डता, अनुशासनं सामूहिकसंकल्पश्च एव आसीत्। हिमाचल- राज्यं सदैव राष्ट्रीय-हिताय अग्रणीभूमिकां निर्वहति स्म, अग्रेऽपि निर्वक्ष्यन्ति।

# प्रधानमन्त्री नरेन्द्रमोदी शुक्रवासरे संयुक्त-अरब-अमीरात, नीदरलैण्ड, स्वीडन, नार्वे, इटली-देशानां षड्दिवसीययात्रां करिष्यति



प्रधानमन्त्री नरेन्द्रमोदी शुक्रवासरे संयुक्त-अरब-अमीरात, नीदरलैण्ड्स, स्वीडन्, नार्वे, इटली-देशानां षड्दिवसीययात्रां करिष्यति। नवदेहल्यां प्रसारमाध्यमान् सम्बोधयन् विदेशमन्त्रालयस्य सचिवः सिबी जार्जः संसूचितवान् यत् पञ्चदेशानां यात्रायाः प्रथमे चरणे श्रीमोदी शुक्रवासरे संयुक्त-अरब-अमीरात देशम् प्राप्स्यति, यत्र सः राष्ट्रपतिना शेख मोहम्मद बीन जायद अल नह्यान इत्यनेन सह मेलनं करिष्यति। सः अवदत् यत् उभौ नेतारौ द्विपक्षीयविषयेषु, विशेषतः ऊर्जा-सहकार्ये, अपि च परस्परहितसम्बद्धेषु क्षेत्रीय-अन्तार्राष्ट्रीयविषयेषु च विचारविनिमयं करिष्यतः।

# परमाणु-परीक्षणं देशस्य अविचल-सङ्कल्पं प्रदर्शयति - प्रधानमन्त्री



प्रधानमन्त्रिणा नरेन्द्र मोदिना अष्टनवत्यधिकनवदश-शत-तमे वर्षे अस्मिन् दिने भारते कृत-परमाणु परीक्षणस्य स्मरणं कृतम्। सामाजिक-माध्यमेषु एकं संस्कृत सुभाषितं विनिमयी कुर्वन् प्रधानमन्त्री उक्तवान् यत् एतत् परमाणु-परीक्षणं देशस्य अविचल-सङ्कल्पं प्रदर्शयति। श्रीमोदी अवदत् यत् अस्य परीक्षणस्य अनन्तरं सम्पूर्णेन विश्वेन भारतं संपीडितम्, परञ्च देशेन सिद्धीकृतं यत् कापि शक्तिः भारतं अवरोद्धुं न शक्नोति।

# केएनएच-चिकित्सालयस्य स्थानान्तरणं न भविष्यतिः सर्वकाराय महती क्षतिः, उच्चन्यायालयस्य तर्जनी

हिमसंस्कृतवार्ताः- शिमलाः कमला नेहरू चिकित्सालयस्य (केएनएच) आईजीएमसी- संस्थानं प्रति स्थानान्तरणस्य विषये फालमा चौहान महोदया द्वारा प्रवर्तितायाः जनहितयाचिकायाः श्रवणं कुर्वन् हिमाचलप्रदेश- उच्चन्यायालयः राज्यसर्वकाराय महतीं क्षतिं प्रदत्तवान्। मङ्गलवासरे श्रवणकाले उच्चन्यायालयः स्थानान्तरणप्रक्रियायाम् अन्तिमविरामं विहितवान्।

न्यायालयः सर्वकारात् अस्मिन् विषये विस्तृतं प्रत्युत्तरं याचितवान्। मुख्यन्यायाधीशः गुरमीत सिंह संधावालिया तथा न्यायाधीशः बिपिन चन्द्र नेगी इत्यनयोः खण्डपीठेन एषा शुश्रूषा कृता। अपि च, उच्चन्यायालयः दन्तचिकित्सालयस्य प्रस्तावमपि स्थगितवान्।

**विवादस्य पृष्ठभूमिः**-राज्यसर्वकारेण अद्यैव कमला नेहरू चिकित्सालयस्य स्त्रीरोगविभागः अन्याः च सेवाः इन्दिरागान्धी आयुर्विज्ञानसंस्थानं प्रति स्थानान्तरयितुं निर्णयः गृहीतः आसीत्। सर्वकारस्य तर्कः आसीत् यत् आईजीएमसी-संस्थाने उत्तमाः सुखसुविधाः सन्ति, येन रुग्णाः उन्नतचिकित्सां प्राप्स्यन्ति।किन्तु शिमला-नगरसहितं प्रदेशस्य विविधभागेषु अस्य निर्णयस्य तीव्रः विरोधः अभवत्। स्थानीयजनैः, अखिल भारतीय जनवादी महिला समितिः, माकपा, विपक्षीदलैः एतत् ऐतिहासिक- चिकित्सालयस्य दुर्बलीकरणस्य षड्यन्त्रम् इति कथितम्। **न्यायालयस्य टिप्पणी**-याचिकाकर्तृणां अधिवक्ता उक्तवान् यत् १०२ वर्षप्राचीनः एषः चिकित्सालयः विशेषतया महिलाभ्यः बालकेभ्यः च अतीव महत्त्वपूर्णः अस्ति। स्थानान्तरणेन दूरस्थेभ्यः आगतेभ्यः रुग्णभ्यः महती समस्या भविष्यति। न्यायालयः स्वास्थ्यविभागात् पृष्टवान् यत्- "अस्य स्थानान्तरणस्य प्रस्तावस्य कारणं किम् तथा च एतेन रुग्णानां कः लाभः हानिः वा भविष्यति?" कमला नेहरू चिकित्सालयः शिमलायाः एकशततवर्षप्राचीनः प्रसिद्धः चिकित्सालयः अस्ति। मुख्यतया स्त्रीरोगस्य प्रसूतिसम्बन्धिनां व्याधीनां च चिकित्सायाः कृते एतत् प्रसिद्धम्।

# पञ्चमासात्मकविरामानन्तरं मनाली-लेह मार्गः उद्घाटितः; बीआरओ (BRO) इत्यनेन हरितसंकेतः दत्तः

हिमसंस्कृतवार्ताःमनाली।सामरिकदृष्ट्या अत्यन्तमहत्त्वपूर्णः मनाली-लेह मार्गः बॉर्डर रोड्स ऑर्गेनाइजेशन इत्यनेन पुनः सञ्चारयोग्यः कृतः।अस्मिन् मार्गे पञ्चमासानन्तरं मई मासस्य 13 दिनाङ्कात् वाहनानां सञ्चरणं पुनः आरभ्यते।

# लोकगायकस्य इन्द्रजीतस्य एकेन पदेन परिवर्तिता प्रवृत्तिः, मोनालपक्षिणः कलगीस्थाने कृत्रिमा 'कलगी' अभवत् जनानां प्रथमा रुचिः





**हिमसंस्कृतवार्ताः- कुल्लूः।** 'हिमाचली-टोपिका', 'पर्वतीय-टोपिका' वा इति नाम्ना अपि प्रसिद्धा अस्ति, सा केवलं शोभाचारस्य चिह्नं नास्ति, अपि तु अस्मिता-सम्मानयोः प्रतीकम् अस्ति। हिमाचल-राज्यस्य जनाः नाटीनृत्ये, विवाहोत्सवेषु, पर्वसु तथा दैनन्दिन-जीवने अपि एतां धारयन्ति। एषा स्वसंस्कृतेः परम्पराश्च प्रति प्रेम्णः अभिव्यक्तेः एकः उपायः अस्ति।
सामान्यतया हिमाचली-टोपी स्वभावतः एव शोभना दृश्यते, किन्तु तस्याः सौन्दर्यं वर्धयितुं हिमालयीय-मोनाल- पक्षिणः वर्णवैचित्र्ययुक्तैः पिच्छकैः अलङ्करणस्य परम्परा आसीत्। अयं मोनाल- पक्षी हिमालयनमोनालः पूर्वं हिमाचल- राज्यस्य राज्यपक्षी अपि आसीत्।किन्तु अवैध- मृगयायाः, अस्य पक्षिणः न्यूनमान- जनसंख्यायाः कारणेन वास्तविक- मोनाल- पिच्छकानाम् उपयोगः कठोरतया निषिद्धः अभवत्। अधुना जनाः हिमाचली-टोपी-अलङ्काराय मोनालपक्षिणः वास्तविक-कलगीस्थाने कृत्रिम- कलगीम् उपयुञ्जते, या प्रायः रजतस्य सुवर्णस्य वा निर्मिता भवति। अद्य एषा कृत्रिमा कलगी लक्षशः जनानां प्रथमा रुचिः जाता अस्ति।
हिमाचले अस्याः कृत्रिम-कलग्याः प्रचारस्य श्रेयः प्रसिद्ध- लोकगायकाय इन्द्रजीताय दीयते। हिमाचली- परम्परागत-टोपीषु मोनाल-पक्षिणः कलगी- प्रयोगेन अस्य संरक्षितस्य सुन्दर-पक्षिणः जीवनम् संकटे पतति स्म। एतत् दृष्ट्वा इन्द्रजीतेन प्रशंसनीयं पदं स्वीकृतम्। तेन वास्तविक-कलगीस्थाने रजतनिर्मित- कृत्रिम- कलग्याः उपयोगस्य प्रचारः कृतः, येन वन्यजीव-संरक्षणाय महत्त्वपूर्णं समर्थनं प्राप्तम्।
अस्य अभियानस्य जन-जन-पर्यन्तं प्रसारणे तस्य "पाखली माणु" इति गीतस्य अत्यन्तं महत्त्वपूर्णा भूमिका आसीत्। अस्य गीतस्य माध्यमेन लोकगायकः इन्द्रजीतः मोनालपक्षिणः वास्तविक-कलगीस्थाने कृत्रिम-कलग्याः स्वीकरणस्य सन्देशं प्रदत्तवान्, यः जनानां हृदयानि स्पृष्टवान्। अस्य सन्देशस्य व्यापक-जनसमर्थनं प्राप्तम् तथा लक्षशः जनाः कृत्रिम-कलगीम् अङ्गीकृतवन्तः, तां च बहु प्रशंसितवन्तः।
अस्य प्रभावः इत्थं व्यापकः आसीत् यत् हिमाचल-राज्यस्य बहिः अपि कृत्रिम-कलग्याः प्रवृत्तिः दृष्टा। अस्य गीतस्य YouTube-माध्यमे 1.34 कोट्यधिकाः दर्शकाः अभवन्, येन अयं सन्देशः विशालस्तरे जनान् प्रति प्रापितः।
अस्याः पदस्य परिणामस्वरूपं बहवः युनः परम्परागत- टोपीषु कृत्रिम-कलगी-प्रयोगम् आरब्धवन्तः, येन मोनालपक्षिणः संरक्षणप्रयत्नाः अधिकं सुदृढाः अभवन्। अस्य प्रशंसनीय-कार्यस्य कृते वन एवं वन्यप्राणी-विभागस्य पक्षतः इन्द्रजीताय प्रशंसा-पत्रम् अपि प्रदत्तम्।कुल्लू-जनपदस्य प्रसिद्ध-लोकगायकः इन्द्रजीतः हिमाचल-राज्यस्य लोकसंस्कृतेः पर्यावरण-संरक्षणस्य च क्षेत्रे महत्त्वपूर्णं योगदानं दत्तवान् अस्ति। औपचारिक- संगीत- प्रशिक्षणस्य अभावेऽपि तेन स्व-लोकगीतैः हिमाचलीपरम्पराः, पारम्परिकवेषभूषाः, लोकवाद्ययन्त्राणि तथा पर्वतीय- जीवनशैली व्यापक-जनमानसे प्रसारिता। इन्द्रजीतेन स्वगीतानां माध्यमेन नशामुक्तिः, महिलासम्मानः, पर्यावरणसंरक्षणं सामाजिक-जागरूकता इत्यादयः विषयाः प्रभावपूर्णतया प्रस्तुताः, येन समाजे सकारात्मकः सन्देशः प्रसारितः।

# ट्रम्प-शी-बीजिंग्-नगरं प्राप्तवान्, उच्चस्तरीये शिखरसम्मेलने भागं ग्रहीष्यति

वाशिंगटन। अमेरिका-देशस्य राष्ट्रपतिः डोनाल्ड् ट्रम्पः स्थानीयसमयानुसारम् गतप्रातः बीजिंग्-नगरं प्राप्तवान्। सः अत्र स्वकीय-चीनी-समकक्षेण शी जिनपिंग-महोदयेन सह उच्चस्तरीये शिखरसम्मेलने भागं ग्रहीष्यति। ईरान-युद्धस्य कारणात् अस्मिन् वर्षे आरम्भे या वार्ता स्थगिता आसीत्, सा अधुना पुनः आरभ्यते। ट्रम्पः मङ्गलवासरे 'व्हाइट् हाउस्' (श्वेतभवनम्) तः प्रस्थितवान् आसीत्।द्वयोः नेतृद्वयोः मध्ये वार्तायां व्यापारस्य विषयः सर्वाधिकं महत्वपूर्णः भविष्यति इति आशा अस्ति। एतेन सह ईरान-युद्धं तथा हॉर्मुज्-जलसन्धि-क्षेत्रे आपूर्ति-बाधासु अपि गम्भीरा चर्चा भवितुं सम्भावना वर्तते।सोमवासरे ट्रम्पः उक्तवान् आसीत् यत् ऊर्जा-सुरक्षा तथा ताइवान-विषयाः अपि चर्चायां समाविष्टाः भविष्यन्ति। वस्तुतः ताइवान-प्रसङ्गः अमेरिका-चीनयोः सम्बन्धयोः मध्ये अत्यन्तं संवेदनशीलः विषयः अस्ति। स्वकीय-यात्रायाः पूर्वं श्री ट्रम्पः सार्वजनिक-कथनेषु बहुवारं श्री शी जिनपिंग-महोदयस्य प्रशंसां कृतवान्। सोमवासरे ओवल-कार्यालये (Oval Office) वार्ताहरैः सह संवादं कुर्वन् सः अवदत्, "ते एकः महान् पुरुषः सन्ति। ते मम कृते अतीव अद्भुत-मानवाः प्रतीयन्ते।"गतसप्ताहे सः उक्तवान् आसीत्, "राष्ट्रपति-शी-महोदयेन सह मम सम्बन्धाः अतीव उत्तमाः सन्ति। वयं चीन-देशेन सह बहु व्यापारं कुर्मः तथा च प्रचुरं धनं प्राप्नुमः।" ट्रम्पः 'ट्रुथ सोशल' इत्यत्र परिहासेन अलिखत् यत् यदा द्वौ नेतौ मिलिष्यतः, तदा शी तं 'आलिङ्गनं' (गले लगायेंगे) करिष्यति। सीबीएस-न्यूज्-इति संस्थायाः वृत्तानुसारं, व्यापार-प्रतिबन्ध-पश्चिमएशिया-सङ्घर्षाणां प्रकोपे सत्यपि विश्लेषकाः वदन्ति यत् उभे सर्वकारौ सम्बन्धानां विकृतिं रोद्धुं तथा च तान् सुधारयितुं प्रयतन्ते।'काउंसिल ऑन फॉरेन रिलेशंस' इत्यत्र चीन-विषयकाणां वरिष्ठा विदुषी जोंगयुआन जोइ लियू कथयति यत् वर्तमानकाले उभयोः पक्षयोः प्राथमिकता परस्पर-सम्बन्धान् स्थिरीकर्तुम् अस्ति।

## राजनैतिकोत्तरप्रतियुत्तरम्

# जयरामः विस्मृतवान् यत् अधुना अस्माकं शासनम् अस्ति, निर्णयान् वयमेव स्वीकरिष्यामः- मुख्यमन्त्री सुक्खुः

हिमसंस्कृतवार्ताः- मण्डी। नगरनिगम- मण्डी- निर्वाचन-समरे मुख्यमन्त्री ठाकुर सुखविन्दर-सिंह-सुक्खुः बुधवासरे विपक्षं केन्द्र-सरकारं च प्रति तीक्ष्णं प्रहारम् अकुरुत्। कांग्रेस- प्रत्याशिनां समर्थनार्थं प्रचारकार्याय मण्डीं प्राप्तः मुख्यमन्त्री स्पष्टतया उक्तवान् यत् केन्द्रस्य भेदभावपूर्ण-राजनीत्या ते न भयभीताः भविष्यन्ति तथा हिमाचलप्रदेशं आत्मनिर्भरं कर्तुं यः संकल्पः कृतः सः अवश्यमेव पूर्णो भविष्यति। बुधवासरे टारणा, नेला, टाऊन- हॉल- स्थलेषु आयोजितासु निर्वाचन-जनसभासु सम्बोधनं कुर्वन् मुख्यमन्त्री विकासं, आपदा-आश्रयं, भाजपायाः नीतिषु तीव्रं प्रहारम् अकरोत्। मुख्यमन्त्री नगरनिगम- गठन- प्रक्रियायाः विषये प्रश्नान् उत्थापयन् उक्तवान् यत् भाजपाशासनकाले जनभावनानाम् अवहेलना कृता। सः विपक्षनेतारं जयराम-ठाकुरं लक्ष्यीकृत्य उक्तवान् यत् जयरामठाकुरः अद्य बैहना-इत्यादीनां ग्रामीण-क्षेत्राणां बहिष्करणस्य विषये वदति, किन्तु सत्तायां स्थित्वा एतानि क्षेत्राणि बलात् निगमस्य अन्तर्गतं तेनैव समावेशितानि आसन्।
मुख्यमन्त्री व्यङ्ग्यपूर्वकम् उक्तवान् यत् सम्भवतः जयरामः विस्मृतवान् यत् अधुना तस्य शासनं नास्ति। अधुना शासनम् अस्माकम् अस्ति तथा जनहिते निर्णयान् वयमेव स्वीकरिष्यामः। सुक्खू-महोदयेन पूर्वमुख्यमन्त्रिणः उपरि केवलं स्वक्षेत्रस्य विकासं कृतवान् इति आरोपः कृतः। तेन उक्तं यत् जयरामठाकुरः मुख्यमन्त्रीपदे स्थित्वा सराजक्षेत्रे अष्टादश- अष्टादश विश्रामगृहाणि निर्मितवान्, किन्तु मण्डी-नगरस्य उपेक्षा कृता। सत्तायां स्थित्वा जयरामाय केवलं सराजः एव स्मृतः, अधुना पुनः निर्वाचनसमये तस्मै मण्डी स्मर्यते तथा "मण्डी ममैव अस्ति" इति विलापं करोति। तेन शिवधाम-परियोजनायाः कृते वित्त- प्रावधानमपि न कृतम् तथा कर्मचरिविहीनानि संस्थानानि उद्घाट्य जनतां भ्रामितवान्।

### निर्वाचन-विजयानन्तरं प्रत्येक-वार्डाय ५०-५० लक्ष-रूप्यकाणां राशिः प्रदास्यते

मुख्यमन्त्री घोषणा कृतवान् यत् नगरनिगम- निर्वाचने विजयप्राप्ते सति जून-मासस्य प्रथम- दिने प्रत्येक-वार्डस्य कृते ५०-५० लक्ष- रूप्यकाणां राशिः त्वरितं प्रदास्यते। मण्डी-नगरस्य सौन्दर्यीकरण-विकासयोः कृते १८० कोटि-रूप्यकाणि व्ययिष्यन्ते तथा आईआरडीपी- योजनायाः १.२० लक्षमहिलाभ्यः प्रतिमासं १५००- १५०० रूप्यकाणां सम्मान-निधिः प्रदास्यते।
प्रधानमन्त्री नरेंद्र-मोदी तथा केन्द्र-सरकारं प्रति प्रहारं कुर्वन् मुख्यमन्त्री उक्तवान् यत् हिमाचलप्रदेशः अद्यापि १५०० कोटि-रूप्यकाणां आपदा-पुटकस्य प्रतीक्षां करोति। सः विनोदपूर्वकं उक्तवान् यत् सम्भवतः सा सहायता-राशिः अधुना सोनीपत-नगरे एव निरुद्धा अस्ति।

### केन्द्रस्य दोषपूर्ण-नीतिभिः सामान्यजनाः महार्घतायाः अनुद्योगस्य च पीडां सहन्ते- रजनीपाटिल

निर्वाचन-प्रचारार्थं मण्डीं प्राप्ता प्रदेश- कांग्रेस- प्रभारी रजनी पाटिल एकतः केन्द्रस्य भाजपाशासनं तीव्रतया आक्षिपत्, अपरतः प्रदेशस्य सुक्खु- शासनस्य कार्यपद्धतेः प्रशंसाम् अकरोत्। प्रचारकार्यक्रमे स्वसम्बोधने रजनी-पाटिल उक्तवती यत् केन्द्रस्य दोषपूर्ण-नीतिभिः अद्य सामान्यजनाः महार्घतायाः अनुद्योगस्य च पीडां सहन्ते। तया आरोपः कृतः यत् भाजपा केवलं वचन-राजनीतिं करोति, यदा तु भूमौ विकासकार्याणि स्थगितानि सन्ति। पाटिल कार्यकर्तृषु उत्साहं सञ्चारयन्ती उक्तवती यत् नगरनिगम-निर्वाचनेषु जनताः भाजपायै कठोरम् उत्तरं दातुं सज्जा अस्ति।

# पश्चिमबङ्गे ऐतिहासिकं राजनीतिकपरिवर्तनम्- संस्कृतशपथग्रहणेन स्पन्दितं समग्रभारतम्





**हिमसंस्कृतवार्ताः- डॉ . निशिकान्तपाण्डेयः।** पश्चिमबङ्गराज्ये सम्पन्ने जनपदे २०२६ तमे वर्षे विधानसभानिर्वाचने भारतीयजनतापक्षस्य अभूतपूर्वा विजयः समग्रदेशवासिनः दृष्ट्वा विस्मयचकितान्, हर्षोल्लासेन च आप्लावितान् अकरोत्। द्विशतचतुःनवतिसदस्ययुक्तायां पश्चिमबङ्गविधानसभायां भारतीयजनतापक्षः स्वबलमेव आश्रित्य सप्ताधिकद्विशतम् (२०७) आसनानि विजित्य स्पष्टबहुमतं प्राप्तवान्। स्वतन्त्रभारतस्य इतिहासे प्रथमवारं पश्चिमबङ्गराज्ये भारतीयजनतापक्षस्य सर्वकारस्य गठनं सम्पन्नम्। राजनैतिकविश्लेषकाणां मते एषा विजयः केवलं दलविशेषस्य सफलता न, अपि तु जनमानसस्य व्यापकपरिवर्तनस्य स्पष्टप्रतीकः अस्ति।नवनिर्वाचितविधायकानां शपथग्रहणसमारोहः अत्यन्तगौरवेण सम्पन्नः। अस्मिन् ऐतिहासिके आयोजने मालदाजनपदस्य इंग्लिशबाजार (रंरेजवाजारः) विधानसभाक्षेत्रस्य विजयी विधायकः **माननीयः अम्लानभादुड़ी महोदयः**, मालदाजनपदस्य वैष्णवनगर-विधानसभाक्षेत्रस्य विधायकः **माननीयः राजूकर्मकार महोदयः** संस्कृतभाषायां शपथवाक्यं पठित्वा सर्वेषां विशेषं ध्यानम् आकर्षितवन्तौ।यदा ताभ्यां वेदानां भाषा, रामायणस्य भाषा, उपनिषदां भाषा, श्रीमद्भगवद्गीतायाः भाषा, देवभाषा च संस्कृतभाषायां शपथः पठितः, तदा समग्रं सभामण्डपं राष्ट्रभावनया, आध्यात्मिक- गौरवेण, सांस्कृतिकचेतनया च परिपूर्णम् अभवत्। उपस्थिताः जनाः करताडनैः अभिनन्दनं प्रकटितवन्तः। संस्कृतभाषायाः एषः प्रयोगः भारतीयसंस्कृतेः सनातनपरम्परायाः च पुनर्जागरणस्य प्रतीकरूपेण परिगणितः। एषः शपथग्रहणसमारोहः विविधदूरदर्शनमाध्यमेषु प्रत्यक्षरूपेण सम्प्रसारितः। संस्कृतभाषायाः मधुरोच्चारणं श्रुत्वा देशस्य विभिन्नप्रदेशेषु स्थिताः दर्शकाः भावविभोराः अभवन्। सामाजिक-माध्यमेष्वपि अस्य समारोहस्य व्यापकः प्रतिसादः दृष्टिगोचरः अभवत्। विद्वांसः, संस्कृतप्रेमिणः, सांस्कृतिकचिन्तकाः च एतादृशं प्रयासं भारतीयसंस्कृतेः गौरवस्य पुनर्स्थापनाय महत्त्वपूर्णं पदक्षेपम् इति वर्णितवन्तः।

अनेकेषां सनातनधर्मानुयायिनां मते पश्चिमबङ्गस्य एतन्निर्वाचनं “सनातनधर्मरक्षणस्य निर्णायकः संघर्षः” आसीत्। तेषां कथनानुसारं गतपञ्चवर्षेषु राज्ये बहवः सामाजिकाः तथा राजनीतिकाः तनावाः दृष्टाः। अनेकाः जनाः आरोपितवन्तः यत् तृणमूलदलस्य कतिपयदुष्कृतिनां हिंसाचारैः त्रिशतैकविंशत्यधिकत्रिशत (३२१) देशभक्ताः सनातनधर्मावलम्बिनः हताः। तदतिरिक्तं विगतपञ्चदशवर्षेषु सनातनधर्मावलम्बिनः स्वधर्माचरणे, सांस्कृतिककार्येषु, तथा स्वमतप्रकाशने विविधाः बाधाः अनुभूतवन्तः इति अपि जनानां मध्ये व्यापकः अभिप्रायः आसीत्।

अस्य निर्वाचनस्य परिणामः अनेकैः **“नवयुगस्य आरम्भः”** इति कथ्यते। पश्चिमबङ्गराजनीतौ जातः एषः परिवर्तनः न केवलं प्रशासनिकपरिवर्तनस्य सूचकः, अपि तु सांस्कृतिकचेतनायाः, धार्मिकस्वातन्त्र्यस्य, लोकतान्त्रिकमूल्यानां च पुनः प्रतिष्ठापनस्य घोषणापत्रमिव दृश्यते।



हिमसंस्कृतवार्ताः , ईदरधीरजः,हैदराबादः

## वार्ता-संवादः

**नन्दिनी-** नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं करोमि। नमस्ते काव्ये।

**काव्या-** नमस्ते नन्दिनि। अद्य का विचित्रा वार्ता त्वया पठिता?

**नन्दिनी-** काव्ये, लुधियाना-नगरे द्वाभ्यां भ्रातृभ्यां स्वभगिन्यै पञ्चाशल्-लक्ष-रूप्यक-मूल्यं नूतनगृहम् उपहाररूपेण दत्तम्। एतेन भ्रातृस्नेहेन अन्तर्जाललोके सर्वे भावुकाः जाताः सन्ति।

**काव्या-** सत्यम्, तादृशं गृहं तु सर्वेषाम् ईप्सितं भवति। किन्तु शृणु, दुबई-नगरे एका प्रभावकारिणी महिला स्व-कार्यं त्यक्तुम् इच्छति। "मम कार्यम् उत्साहजनकं नास्ति" इति तया उक्तम्। इदानीं सा कार्यालयीयम् उद्योगम् अन्विष्यति।

**नन्दिनी-** कार्ये विरक्तिः तु कदापि भवितुं शक्नोति। फलस्य लोभः अपि कष्टकरः भवति। सिंहपुरनगरे भूमौ पतितम् आम्रफलं स्वीकर्तुं सार्ध- त्रिलक्ष-रूप्यकाणां दण्डः दातव्यः भवति इति एका महिला सूचितवती अस्ति।

**काव्या-** अहो! तावन्मितं मूल्यं दत्त्वा तु कश्चन आम्र- वनमेव क्रेतुं शक्नोति! लन्दन-नगरे अपि जनाः कष्टं प्राप्तवन्तः अभूवन्। तत्र स्वयम्- चालित- यानैः अर्धरात्रौ उच्चैः सर्वजागरकः शब्दः कृतः।


**नन्दिनी-** नूनं यन्त्राणि अपि कदाचित् उन्मत्तानि भवन्ति। अद्य एतावदेव, पुनर्मेलिष्यामः।



## "हिन्दुधर्मः जीवनपद्धतिः, न तु केवलं कर्मकाण्डम्" - सर्वोच्चन्यायालयः

नवदेहली। सर्वोच्चन्यायालयः बुधवासरे हिन्दुधर्मं प्रति महतीं टिप्पणीं अकरोत्। न्यायालयेन उक्तं यत् हिन्दुधर्मः केवलं पूजा-पद्धतिः अथवा धार्मिक-अनुष्ठानेषु सीमितः नास्ति, अपितु एषा जीवनयापनस्य एका शैली (जीवनपद्धतिः) वर्तते। शीर्षन्यायालयेन प्रतिपादितं यत् कस्यचित् व्यक्तिस्य हिन्दुत्वं रक्षितुं मन्दिरगमनं वा विशिष्ट-धार्मिक-कर्मकाण्डं वा अनिवार्यं नास्ति। यदि कश्चित् जनः स्वकीये गृहे वा कुटीरे वा केवलं दीपं प्रज्वालयति, तर्हि तदेव तस्य श्रद्धां धर्मं च प्रमाणीकर्तुं पर्याप्तं अस्ति। एषा टिप्पणी मुख्यन्यायाधीश-सूर्यकान्त-महोदयस्य अध्यक्षतायां नव-न्यायाधीशानां संविधानपीठेन कृता। इयं पीठः धार्मिक-स्वातन्त्र्यस्य, महिलानां धर्मस्थलेषु प्रवेशस्य तथा च विभिन्नानां समुदायानां धार्मिक-परम्पराणां विषये श्रवणं करोति। एतेषु शबरीमाला-मन्दिरप्रकरणं तथा च दाऊदी-बोहरा-समुदायस्य विषयाः अपि अन्तर्भूताः सन्ति। संविधानपीठे न्यायमूर्ति-बी.वी. नागरत्ना, एम.एम. सुन्देश, अहसानुद्दीन अमानुल्लाह, अरविन्द कुमार, ऑगस्टीन जॉर्ज मसीह, प्रसन्ना बी. वराले, आर. महादेवन तथा च जॉयमाल्या बागची महोदयाः सम्मिलिताः सन्ति। श्रवणस्य १५ तमे दिने कार्यवाही-आरम्भे एकस्य हस्तक्षेपकर्तुः पक्षतः वरिष्ठ-अधिवक्ता डा. जी. मोहन गोपालः अवदत् यत् धार्मिक-समुदायानां अन्तः सामाजिक-न्यायस्य अपेक्षा वर्धमाना अस्ति। सः उक्तवान् यत् १९६६ तमे वर्षे एकेन निर्णयेन प्रतिपादितं यत् सः एव हिन्दुः यः वेदान् सर्वोपरि मन्यते। डा. गोपालः तर्कं दत्तवान् यत् "किं वास्तवतः सर्वे हिन्दवः वेदान् धर्म-दर्शनेषु सर्वोच्चं मन्यन्ते?"

अस्मिन् प्रसङ्गे न्यायमूर्ति-बी.वी. नागरत्ना अवदत्, "अत एव हिन्दुधर्मः जीवनपद्धतिः इति कथ्यते। हिन्दुत्वं रक्षितुं मन्दिरगमनं कर्मकाण्डं वा न आवश्यकम्।" सा अग्रे उक्तवती यत् कस्यापि श्रद्धायाः मार्गे कोऽपि अवरोधं स्रष्टुं न शक्नोति। मुख्यन्यायाधीशः सूर्यकान्तः अपि समर्थयन् अवदत् यत् "यदि कश्चित् जनः स्वकुटीरे दीपं प्रज्वालयति, तर्हि स एव तस्य धर्मस्य पर्याप्तं प्रमाणम् अस्ति।"




## "लौकिकन्यायकोशः"

## "कुल्याप्रणयन्यायः"

नदीतः क्षेत्रे जलं प्रवहतु इति धिया एका कुल्या निर्मियते चेत् तया कुल्यया क्षेत्रस्य एव प्रयोजनं भवति इति नास्ति, अपराणि अपि प्रयोजनानि भवन्ति। तथा एकया क्रियया अनेकप्रयोजनानि साध्यन्ते इति अनेन न्यायेन बोध्यते।

**डा. वर्षा प्रकाश टोणगांवकर पुणे/ महाराष्ट्रम्**